अस्मिन् प्रश्नपत्रपुस्तिकायाम् 28 प्रश्नाः [ खण्ड–क (20) + खण्ड–ख (4+4) ] एवं 8 पृष्ठाः सन्ति ।

Roll No.
अनुक्रमांक

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

Code No. 59/SS/O/S
कोड नं.

SET/सेट **A**

# SANSKRIT
# संस्कृतम्
# (309)

**Day and Date of Examination**
**(परीक्षादिवसः दिनाङ्कश्च)** ______________________

**Signature of Invigilators** 1. ______________________
**(निरीक्षकयोः हस्ताक्षरम्)**
2. ______________________

**सामान्य अनुदेशाः :**

**1** परीक्षार्थी प्रश्नपत्रपुस्तिकायाः प्रथमपृष्ठे स्व–अनुक्रमाङ्कम् अवश्यं लिखतु ।

**2** निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्षणीयम् ।

**3** उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।

**4** स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट(कोड) संख्या **59/SS/O/S, सेट-A** अवश्यमेव लेखनीया ।

# SANSKRIT
# संस्कृतम्
# (309)

समय : होरात्रयम् ] [ पूर्णाङ्काः – 100

**निर्देशाः –** (i) अस्मिन् प्रश्नपत्रे **द्वौ** खण्डौ स्तः । खण्ड – क (केन्द्रिकः पाठ्यक्रमः), खण्ड – ख (वैकल्पिक–I एवं वैकल्पिक–II) स्तः ।

(ii) खण्ड – क अनिवार्यः । अस्मिन् खण्डे 20 प्रश्नाः सन्ति ।

(iii) खण्ड – ख **एकः** एव वैकल्पिकः समाधेयः ।

(iv) खण्ड – क कृते 85 अङ्काः, खण्ड – ख संस्कृतं संस्कृतिश्च अथवा प्रयोजनमूलकसंस्कृतम् इति वैकल्पिकयोः केवलम् एकः एव वैकल्पिकः समाधेयः । अस्य कृते 15 अङ्काः निर्धारिताः ।

## खण्ड – क
## (केन्द्रिकः पाठ्यक्रमः)

**1** अधोलिखितेषु कस्यचिदेकस्य पाठस्य सारं षड्वाक्येषु लिखत – **6**

(क) अतिलोभः न कर्त्तव्यः

(ख) कल्पनाकीर्तिः विजयते

(ग) परार्थे आत्मोत्सर्गः

**2** अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत – **1×4=4**

न हि कोपकलुषिता विमृशति मतिः कर्त्तव्यम् अकर्त्तव्यं वा । रोषदोषविषये स्वहृदयेनिग्राह्ये किमर्थमसि निगृहीतवाननागसां सरस्वतीम् । इत्युक्त्वा पुनराह – 'वत्से सरस्वति, विषादं मा गाः । एषा त्वामनुयास्यति सावित्री ।'

**प्रश्नाः –**

(क) कीदृशी मतिः कर्त्तव्यम् अकर्त्तव्यम् वा न विमृशति ?

(ख) 'अनागसाम्' इति पदस्य कः अर्थः ?

(ग) सरस्वतीम् का अनुयास्यति ?

(घ) कः सरस्वतीं विषादं न कर्तुम् अकथयत् ?

3 अधोलिखितानां प्रश्नानाम् उचितमुत्तरं कोष्ठकात् चित्वा लिखत – 1×4=4

(क) सुहृदो दुःखेन कः स्वयं दुःखी भवति ? (सुहृत्/अरिः)

(ख) कल्पना चावलायाः कस्यां विशिष्टा रुचिः आसीत् ? (व्यवसाये/वैमानिक्यां)

(ग) दुर्लभानि कार्याणि केन सिध्यन्ति ? (आलस्येन/उद्यमेन)

(घ) परमाणुकेन्द्राद्उत्सृष्टः रश्मिपुञ्जः कीदृशः भवति ? (विनाशकः/रक्षकः)

4 (क) रेखाङ्कितपदमाश्रित्य प्रश्ननिर्माणं कुरुत – 1×2=2

(i) समुद्रस्यजलं सूर्योदये स्वर्णमयं भवति ।

(ii) आचार्यस्य उपदेशाः उपासितव्याः ।

(ख) प्रश्नान् उत्तरत – 1×2=2

(i) अस्माकं देशात् सर्वप्रथमं कः अन्तरिक्षं गतः ?

(ii) प्लास्टिकसर्जरी विज्ञानस्य कः जनकः ?

5 एतत्कथनं कः कं प्रति कथयति ? 2

(क) अये तात, बलरामोऽहं अभिवादये ।

(ख) चिन्ता मा अस्तु । पुनःस्वीकरोतुतदेव फलम् ।

6 अधोलिखितं श्लोकद्वयं पठित्वा प्रश्नान् उत्तरत – 2+2=4

(क) को वर्धते विनीतः को वा क्षीयेतयोदृप्तः ।
कोन प्रत्येतव्यो ब्रूते यश्चानृतं शश्वत् ॥

**प्रश्नद्वयम् –**

(i) कस्य सदा क्षयः भवति ?

(ii) कस्मिन् विश्वासः न करणीयः ?

(ख) ब्रह्म सूर्यसमं ज्योतिर्द्यौः समुद्रसमं सरः ।
इन्द्रः पृथिव्यै वर्षीयान् कस्य मात्रा न विद्यते ॥

**प्रश्नद्वयम् –**

(i) समुद्रसमं सरः किम् ?

(ii) पृथिव्यै कः वर्षीयान् ?

7 अधोलिखितयोः अन्वयद्वयोः रिक्तस्थानपूर्तिं कुरुत – 2

(क) अस्त्युत्तरस्यां दिशिदेवतात्मा हिमालयोनाम नगाधिराजः ।

पूर्वापरौ तोयनिधीवगाह्य स्थितः पृथिव्या इव मानदण्डः ॥

अन्वयः –

उत्तरस्यां दिशि देवतात्मा हिमालयोनाम ________ अस्ति, पूर्वापरौ तोयनिधी वगाह्य पृथिव्या मानदण्डः इव ________ ।

(ख) कस्तूरी जायते कस्मात् को हन्ति करिणां कुलम् ।

किं कुर्यात् कातरो युद्धे, मृगात् सिंहः पलायनम् ।

अन्वयः –

कस्तूरी कस्मात जायते ? करिणां कुलम् कः ________ कातरः ________ किं कुर्यात् ?

8 अधोलिखित पद्यांशद्वयस्य भावार्थयोः रिक्तस्थानानि पूरयत – 2

(क) बलं शिरः कपालानां विशेषेणाभिवर्धते ।

भावार्थः –

शिरसि तैलप्रयोगेण शिरसः अस्थ्नां ________ वर्धते, अर्थात् जनः अधिकः क्रियाशीलः भवति ।

(ख) अनुव्रतः पितुः पुत्रः माता भवतु संमनाः ।

भावार्थः –

पुत्रः पितुः आज्ञाकारी स्यात्, माता च यथा चिंतयति तथा ________ ।

9 पद्यांशं 'अ' स्तम्भात् 'ब' स्तम्भेन सह मेलयत – 2

| स्तम्भ–'अ' | स्तम्भ–'ब' |
|---|---|
| (i) आपः कुत्र भवन्ति | (क) भद्रया वाचं वदत |
| (ii) कया वाचं वदत | (ख) साचिव्येऽवरयत् स्वयम् |
| (iii) कृत्वात्मसदृशीं पूजाम् | (ग) फलाग्रे वृक्ष एव च |
| (iv) वृक्षाग्रे फलं दृष्टम् | (घ) आपः स्रोतः सु भवन्ति । |

10 'हृदयपरिवर्तनम्' इति नाटकस्य सारांशं षड्वाक्येषु लिखत । सहायतायै बिन्दवः दत्ताः – 6

| बिन्दवः |
|---|
| ब्राह्मणवेशधारिणः, यक्षाः, राज्ञः, राज्ये वने, वादितं, ते, विचरन्ति, गोपालकेन, वंशीध्वनिं, वंशीवादकः, समीपे, गवां, सर्वे, अग्रे, गोपालकः, कथयति राजा तेषां, बोधिसत्त्वराज्ये, राजा, इच्छानुरूपं, मांसमो जनं, यच्छन्तिः, सर्वे, अहिंसकाः जाताः, हिंसा त्यक्ता । |

11 अधोलिखितं नाट्यांशद्वयं पठित्वा प्रश्नान् उत्तरत – 1+1=2

(क) राजा – प्रतीहारिन्, पुनः तं जीर्णवस्त्रधारिणम् लब्धदत्तम् आह्वयतु ।

प्रतीहारी – यथा आज्ञापयति महाराजः । (गच्छति लब्धदत्तेन सह प्रविश्य) एषः लब्धदत्तः ।

लब्धदत्तः – जयतु महाराजः । क्षम्यताम् बुभुक्षया पीडितोऽहं तत्फलम् एकेन रूप्यकेण विक्रीतवान् ।

राजा – चिन्तामास्तु । पुनः स्वीकरोतुतदेव फलम् ।
(लब्धदत्तः फलं स्वीकृत्य निर्गच्छति)

**प्रश्नाः –**

(i) प्रतीहारी केन सह प्रविशति ?

(ii) लब्धदत्तः किमर्थं फलमेकेन रूप्यकेण विक्रीतवान् ?

(ख) विभवानुगता भार्यासुखदुःखसुहृद् भवान् । 1×2=2

सत्यञ्च न परिभ्रष्टं यद्दरिद्रेषु दुर्लभम् ॥

**प्रश्नाः –**

(i) चारुदत्तभार्या कीदृशी आसीत् ?

(ii) दरिद्रेषु किं दुर्लभं दृश्यते ?

12 अधोलिखितं गद्यांशं पद्यांशं च पठित्वा उभयोः प्रदत्तप्रश्नान् उत्तरत –

(क) गद्यांशः

अस्माकं विद्यालयः शान्तवातावरणे स्थितः अस्ति । अमुंपरितः हरीतिमा वर्तते । विशालं क्रीडाक्षेत्रम् अस्ति, यत्र छात्राः स्वरुच्यनुसारं विभिन्न क्रीडासुभागं गृह्णन्ति । विद्यालये एकं सभागृहम् अस्ति यत्र सांस्कृतिककार्यक्रमाः भवन्ति । शिक्षकाः स्नेहेन अस्मान् पाठयन्ति । विद्यालयस्य परीक्षाफलम् अत्युत्तमं भवति ।

**प्रश्नाः –**

(i) विद्यालयः कीदृशे वातावरणे स्थितः ? 2

(ii) सांस्कृतिक कार्यक्रमः कुत्र भवति ? 2

(iii) गद्यांशस्य शीर्षकं लिखतु । 1

(ख) पद्यांशः

न कश्चित् कस्यचिन्मित्रम् न कश्चित् कस्यचिद्रिपुः ।

व्यवहारेणजायन्ते मित्राणि, रिपवस्तथा ॥

**प्रश्नाः –**

(i) प्राकृतिकरूपेण कोऽपि किं न भवति ? 2

(ii) मित्राणि कथं जायन्ते ? 2

(iii) पद्यांशस्य शीर्षकं लिखतु । 1

13 मञ्जूषापदसहायतया 'परोपकारः' इति विषयमधिकृत्य दशवाक्यानि लिखत – 1×10=10

| मंजूषा |
|---|
| परेषाम्, उपकारः, कथ्यते, परोपकारः, परोपकारः लाभाय, भवति, समाजे, जनाः, समये, उपकारं, कुर्वन्ति, वृक्षाः, फलन्ति, नद्यः, वहन्ति परोपकाराय, साधवः सज्जनाः, परोपकाराय जीवनम् अर्पयन्ति, सर्वेषु परोपकारस्य, भावना, स्यात् । |

14 भवान् शोभितः । भवतां मित्रं द्वादशकक्षायां प्रथमश्रेण्याम् उत्तीर्णः तस्मै वर्धापनपत्रं लिखतु । 6

15 पितुः पुत्रस्य मध्ये ''धूम्रपानेन हानिः'' इति विषयेचत्वारिवाक्यानि संवादरूपेण लिखत । 1×4=4

16 रेखांकितपदे संधिच्छेदं कुरुत – 1

(क) ब्रूते यश्चानृतं शश्वत् ।

(ख) सुरेन्द्रदत्तं तृषिताः पिबन्ति ।

17 रेखांकितपदे का विभक्तिः किं च मूलपदम् ? 2

(क) सुश्रुतस्य अद्यतनख्यातिः नासाप्रतिष्ठाने अस्ति ।

(ख) अत्र विस्तीर्णे आसने आस्यताम् ।

18 समुचितपदनिर्माणं कृत्वा रिक्तस्थानं पूरयत – 1×4=4

(क) ________ मूलं क्षमा अस्ति । (तपस् + उचित विभक्ति)

(ख) वातावरणे विभिन्ना ________ व्याप्ताः भवंति । (ध्वनि + उचित विभक्ति)

(ग) शार्दूलः कस्य ________ आज्ञां दत्तवान् । (वध + उचित विभक्ति)

(घ) राजा ________ संलापम् अशृणोत् । (रात्रि + उचित विभक्ति)

19 यथानिर्दिष्टं कुरुत – 1×4=4

(क) क्वचित् प्रगीता इव षट्पदौधैः । (रेखांकितस्य विग्रहं कुरुत)

(ख) देवैः परिवृतः । (रेखांकितस्य प्रकृतिप्रत्ययं लिखत)

(ग) कुजः भूमिपुत्रः कथ्यते । (रेखांकितस्य विग्रहं कुरुत)

(घ) जीवकेन शल्यचिकित्सा कृता । (रेखांकितस्य प्रकृतिप्रत्ययं लिखत)

20 (i) एकम् अव्ययम् एकम् उपसर्गं च चित्वा लिखत – 2

(क) संरक्षित पशूनाम् हननं दंडनीयम् ।

(ख) तेन सह सोऽपि गतः ।

(ii) 'क्त्वा' प्रत्ययं प्रयुज्य वाक्यद्वयं योजयत – 2

(क) सः पुस्तकं पठति ।

(ख) सः लेखं लिखति ।

## खण्ड – ख

### वैकल्पिक–I

### (संस्कृतं संस्कृतिश्च)

21 अधोलिखितकाव्यानां तेषांलेखकैः सह मेलनं कृत्वा लिखत – 2

| 'अ' | 'ब' |
|---|---|
| (i) स्वातंत्र्यसंभवम् | (क) राजेन्द्र मिश्रः |
| (ii) थाईदेश विलासम् | (ख) रसिक बिहारी जोशी |
| (iii) करुणाकटाक्षलहरी | (ग) सत्यव्रत शास्त्री |
| (iv) भारतशतकम् | (घ) रेवाप्रसाद द्विवेदी |

22 (क) अधोलिखितसंख्यानां कृते संस्कृतपदानि लिखत – 2

$10^7$, $10^{10}$, $10^6$, $10^{55}$

(ख) कयोश्चिद्द्वयोः प्रमुखगणितज्ञयोः नामानि लिखत । 2

(ग) अष्टांगहृदयस्य रचयिता कः ? अस्मिन् ग्रन्थे कस्य वर्णनं विशेषरूपेण प्राप्यते ? 2

(घ) 'अश्वत्थः सर्ववृक्षाणाम्' इति कस्मिन् ग्रन्थे उक्तम् ? 1

23 वर्णानाम् उच्चारणे प्रयत्नः कः कथ्यते ? सः कतिविधः भवति ? 1+1=2

24 (क) शिक्षया संबद्धाः कति संस्काराः सन्ति ? विद्याध्ययन समाप्तौ कः संस्कारः क्रियते ? 2

(ख) वर्णाश्रमव्यवस्थायाम् आश्रमाः कति विद्यन्ते ? 1

(ग) नवजातस्य मुण्डन संस्कारः कदा क्रियते ? 1

## वैकल्पिक–II

## (प्रयोजनमूलकसंस्कृतम्)

**21** अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत – **1×4=4**

(क) संस्कृतम् विश्वस्य ________ भाषा ।

(ख) वैदिकशब्दानां ज्ञानम् ________ इति वैदिककोशेन सम्यक् भवति ।

(ग) संस्कृतज्ञः सेनायां ________ पदे नियुज्यते ।

(घ) विज्ञापनस्य ________ विशिष्टं महत्त्वम् अस्ति ।

**22** अधोलिखितान् प्रश्नान् उत्तरत – **1×4=4**

(क) पुराणानि कति सन्ति ?

(ख) शून्य सिद्धान्तस्य मान्यता केन कृता ?

(ग) पत्रपत्रिकासु विज्ञापनस्य भाषा कीदृशी भवति ?

(घ) संस्कृतज्ञानां कृते जीवननिर्वाहाय का उत्तमा सेवावृत्तिः ?

**23** मासिकं पत्रं किं भवति ? एकस्य संस्कृतमासिकपत्रस्य उल्लेखं कुरुत । **2**

**24** (क) पत्रपत्रिकाणां प्रकाशनाय केषां नियमानाम् अनुपालनम् आवश्यकं भवति ? **1**

(ख) एकस्य पाक्षिकसंस्कृतपत्रस्य नामोल्लेखम् कुरुत । **1**

(ग) 'अर्वाचीन संस्कृतम्' इति पत्रिका कुतः प्रकाश्यते ? **1**

(घ) त्रुटिशोधने प्रयुक्तम् अधोलिखितं चिह्नद्वयम् अभिप्रायेण सह मेलयत – **2**

| (अ) | (ब) |
|---|---|
| (क) (Bold) | विलोपं करणीयं वर्धनीयम् |
| (ख) (D/e) | स्थूलाक्षरे परिवर्तनीयम् |